# Rishi Agastyaproktam Shivalingasvarupopadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવલિઙ્ગસ્વરૂપોપદેશમ્

## Document Information

Text title : Rishi Agastyaproktam Shivalingasvarupopadesham

File name : shivalingasvarUpopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | vAvRittashlokAH||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિ અગસ્ત્યપ્રોક્તં શિવલિઙ્ગસ્વરૂપોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

સનાતનઃ (ઉવાચ)

શિવલિઙ્ગાનિ પૂજ્યાનિ કાનિ કાનિ મુનીશ્વર ।
એતત્સર્વં વિશેષેણ વદ મહ્યં કૃપાનિધે ॥ ૨૫૧॥

દધીચિરુવાચ

ઇતિ તદ્વચનં શ્રુત્વા પ્રહૃષ્ટવદનો મુનિઃ ।
શિવલિઙ્ગસ્વરૂપાણિ વક્તું સમુપચક્રમે ॥ ૨૫૨॥

અગસ્ત્યઃ ઉવાચ

શિવલિઙ્ગાનિ તિષ્ઠાન્તિ વિવિધાન્યુત્તમાનિ ચ ।
તત્સ્વરૂપાણિ સર્વાણિ વક્ષ્યે સનાતન ॥ ૨૫૩॥

શિવલિઙ્ગસ્વરૂપં તુ વક્તું યદ્યપિ નોચિતમ્ ।
તથાપિ શિવભક્તાય તુભ્યં તત્પ્રવદામ્યહમ્ ॥ ૨૫૪॥

શિવલિઙ્ગસ્ય મહાત્મ્યં યસ્ય કસ્યાપિ સત્વરમ્ ।
ન વક્ત્વ્યં યતસ્તત્તુ ગોપનીયં પ્રયત્નતઃ ॥ ૨૫૫॥

યસ્યાસ્તિ શ્રુતિષુ શ્રદ્ધા યસ્ય શ્રદ્ધા મહેશ્વરે ।
તસ્યૈવ શિવમાહાત્મ્યે શ્રદ્ધા નાન્યસ્ય સર્વથા ॥ ૨૫૬॥

યસ્યાસ્તિ શિવમાહાત્મ્યે શ્રદ્ધા મુક્તિપ્રદાયિની ।
તસ્મૈ વકવ્યમુત્કૃષ્ટં શિવમાહાત્મ્યમાદરાત્ ॥ ૨૫૭॥

ધન્યોઽસિ કૃતકૃત્યોઽસિ શિવભક્તોઽસિ યન્મુને ।
શઙ્કરાનુગૃહીતાનાં શિવે ભક્તિઃ પ્રજાયતે ॥ ૨૮૩॥

શ્રુતિશ્રદ્ધા તવાતીવ યતઃ શિવમયો હ્યસિ ।
ભક્તિરન્યાહશી શમ્ભૌ યતસ્તેઽસ્તિ સનાતન ॥ ૨૮૪॥

તતસ્તે શિવલિઙ્ગાનાં માહાત્મ્યં પ્રવદામ્યહમ્ ।

- -

શિવલિઙ્ગેષુ સર્વેષુ રસલિઙ્ગમનુત્તમમ્ ।
તત્ર સમ્પૂજિતઃ શમ્ભુઃ પ્રસીદતિ ન સંશયઃ ॥ ૨૮૫॥

રસલિઙ્ગે મહાદેવં સમ્પૂજ્યાન્વહમાદરાત્ ।
ભુક્ત્વા ભોગાનિહાન્તે ચ શિવં પ્રાપ્નોત્યસંશયમ્ ॥ ૨૮૬॥

હૈમરૌપ્યાદિલિઙ્ગેષુ સમ્પૂજ્ય પરમેશ્વરમ્ ।
સર્વપાપવિનિર્મુક્તાઃ પ્રયાન્તિ શિવમન્દિરમ્ ॥ ૨૮૭॥

કાશ્મીરલિઙ્ગમમલં પુરા વિષ્ણુર્યથાવિધિ ।
પૂજયિત્વા પરામૃદ્ધિં લક્ષ્મીં ચાવાપ શોભનામ્ ॥ ૨૮૮॥

વિધિર્મરકતે લિઙ્ગે સમભ્યર્ચ્ય મહેશ્વરમ્ ।
સૃષ્ટિકર્તાઽભવત્પૂર્વં મહાદેવપ્રસાદતઃ ॥ ૨૮૯॥

હેમલિઙ્ગે સમભ્યર્ચ્ય મહાદેવં શચીપતિઃ ।
વૃત્ત્રં હત્વા વિના યત્નાત્સ્વર્ગં પ્રાપ પુનર્મુદા ॥ ૨૯૦॥

વૈદ્રુમં લિઙ્ગમભ્યર્ચ્ય યોગસિધ્યર્થમાદરાત્ ।
યોગિનો યોગસમ્પન્ના જાતા ભસ્મવિભૂષણાઃ ॥ ૨૯૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવલિઙ્ગસ્વરૂપોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । વાવૃત્તશ્લોકાઃ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. vAvRRittashlokAH..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય; delivers Upadeśa ઉપદેશ to Sanātana Muni સનાતન મુનિ about worshiping Śivaliṅga-s શિવલિઙ્ગાનિ made of various materials including Rasaliṅga રસલિઙ્ગ, Hemaliṅga હેમલિઙ્ગ, Raupyaliṅga રૌપ્યલિઙ્ગ, Kāśmīraliṅga કાશ્મીરલિઙ્ગ, Marakataliṅga મરકતલિઙ્ગ, Vaidrumaliṅga વૈદ્રુમલિઙ્ગ.

Chapter 27 further has details about worshiping the Mṛttikāliṅga મૃત્તિકાલિઙ્ગ / Mṛnmayaliṅga મૃન્મયલિઙ્ગ / Mṛlliṅga મૃલ્લિઙ્ગ - as told by Himavān હિમવાન્ to his son Maināka મૈનાક.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivalingasvarupopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*